प्रयत्नभेदे तत्प्रयत्नयुक्तेषु वर्णेषु च । ते च वर्णाः “खयां यमाः खयः+कँपौ विसर्गः शर एव च । एते श्वासानुप्रदाना अघोषाश्चेत्युक्ताः वेदितव्याः । विवरणं मत्कृतशब्दार्थरत्ने सूचीपत्ने द्रष्टव्यम् । शब्दशून्ये त्रि० ।

**अघोषवत्** त्रि० अघोषः वर्णोच्चारणवाह्यप्रयत्नः अस्त्यस्य मतुप् मस्य वः । “खयां यमाः-खय+कँपौ विसर्गः शरएचेत्युक्तेषु वर्णेषु ।

**अघ्न्य** पु० न हन्ति सृष्टिकर्त्तृत्वात् न+हन-यक् निपातनात् साधु । प्रजापतौ । न हन्यते स्त्रीहत्यायाः, “अवध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपीति” निषिद्धत्वात् कर्म्मणि नि० । हननकर्म्मताशून्यायां स्त्रियां गवि स्त्री । अघ्न्या “गवां पतिरघ्न्य” इति वेदः । “पतिं वो अघ्न्यानामिति” वेदः “गावः प्राश्नन्त्यघ्न्या इति” च वेदः ।

**अघ्रेय** त्रि० न घ्रातुं शक्यः अर्हः वा घ्रा-शक्याद्यर्थे यत् न० त० । घ्राणानर्हे दुर्गन्धे वस्तुमात्ने, मद्ये न० । “मदिराघ्राणमात्रेण ब्राह्मण्यादेव हीयते” इति स्मृतौ मद्यस्य घ्राणनिषेधात् तस्य तथात्वम् ।

**अङ्क** (न्क) संख्याकरणे चिह्नयुक्तकरणे अदन्तचुरादि० उभ० सक० सेट् । अङ्कय-ति ते आञ्चिक-त्-त । अङ्कापयति ते इति केचित् । “प्रेयांसमाङ्कयदसौ न विधौ कलङ्क” इत्युद्भटः । “पुक् चेत्यङ्कापयत्यपीति” कामधेनुः । अच् अङ्कः । क्त अङ्कितः ल्युट् अङ्कनम् असुन् अङ्कः ।

**अङ्क** पु०न० अङ्क-करणे, कर्त्तरि वा अच् । चिह्ने “रतिवलयपदाङ्के चापमासज्य कण्ठे” इति कुमा० । कलङ्के, “एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्क” इति कुमा० । दृश्यकाव्याङ्गभेदे तल्लक्षणं यथा “प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः । भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥ विच्छिन्नावान्तरैकार्थः किञ्चित्संलग्नविन्दुकः । युक्तो न बहुभिः कार्य्यैर्वीजसंहृतिमान् न च ॥ नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् । आवश्यकानां कार्य्याणामविरोधाद्विनिर्म्मितः ॥ नानेकदिननिर्व्वर्त्त्यकथया सम्प्रयोजितः । आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा ॥ दूराह्वानं बधो युद्धं राज्यदेशादिविप्लवः । विवाहो भोजनं शापोत्सर्गौ मृत्यू रतन्तथा ॥ दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरञ्च यत् । शयनाधरपानादि नगराद्युपरोधनम् ॥ स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः । देवीपरिजनादीनाममात्यवणिजामपि ॥ प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः । अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः” इति सा० ॥ दृश्यकाव्यरूपकभेदे च पु० । यथा “नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश” इति विभज्य “उत्सृष्टिकाऽङ्क एकाङ्को नेतारः व्याप्टता नराः । रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम् ॥ प्रख्यातमितिवृत्तञ्च कविर्बुद्ध्या प्रपञ्चयेत् । भाणवत् सन्धिवृत्ताङ्गान्यस्मिन् जयपराजयौ ॥ युद्धञ्च वाचा कर्त्तव्यं निर्वेदवचनं बहु” । इति लक्षितम् “इमञ्च केचित् नाटकाद्यन्तःपात्यङ्कपरिच्छेदार्थम् उत्सृष्टिकाङ्कनामानम्” आहुः । अन्ये तु “उत्क्रान्ता विलोमरूपा सृष्टिर्यत्रेति उत्सृष्टिकाङ्कः” इति सा० । पर्व्वते, समीपे, युद्धभूषणे, देहे, अपराधे, स्थाने, चित्रयुद्धे परम्परासम्बद्धे चिह्ने च पु० । क्रोड़े पु० न० “अनन्यनारीकमनीयमङ्कमिति” कुमा० । “अङ्के निधाय तं बालं पुनः संस्कारमर्हतीति” स्मृतिः । “पुनरङ्काश्रयणी भवामि ते” इति कुमा० । “प्रेम्णोपकण्ठं मुहुरङ्कभाजो रत्नावलीरम्बुधिराबबन्धेति” माघः । “अङ्कः समीपम् उत्सङ्गश्च” इति मल्लिनाथः । एकत्वादिसंख्याबोधकरेखासन्निवेशे- “अङ्कयुतिः किल सङ्कलिताख्येति” लीला० । नवसंख्यायाञ्च पु० ।

**अङ्कतन्त्र** न० अङ्कानामेकादिपरार्द्धान्तसंख्याबोधकरेखाविशेषाणां प्रतिपादकम् तन्त्रं शास्त्रम् । अङ्कशास्त्रे व्यक्ताव्यक्तरूपे, पाटीगणितवीजगणितादौ ।

**अङ्कति** पु० अन्च-गतौ अति कुत्वम् । वाते । पूजनार्थात् कर्म्मणि अति । ब्रह्मणि, अग्नौ, अग्निहोत्रिणि च । गन्तरि त्रि० स्त्रियाम् वा ङीप् अङ्कती च ।

**अङ्कधारण** न० ६त० । चिह्नधारणे तप्तमुद्रादिवैष्णवचिह्नधारणे च । धृ-णिच् भावे युच् । अङ्कधारणाप्यत्र स्त्री ।

**अङ्कन** न० अङ्क-करणे ल्युट् । अङ्कनसाधनद्रव्ये गदा(गनीति) प्रसिद्धे । भावे ल्युट् । चिह्नकरणमात्रे न० । “अन्यत्राङ्कनलक्ष्मभ्यां वाहनिर्म्मोचने” इति स्मृतिः । अङ्कनं त्रिशूलादिचिह्नकरणमिति प्रा० रघु० । भावे युच् । अङ्कनाप्यत्र स्त्री ।

**अङ्कपादव्रत** न० व्रतभेदे ।

**अङ्कपालि** स्त्री पा-अलि ६त० वा ङीप् । क्रोड़प्रान्ते । अङ्केन पालयतीति पालि-इ २त० । उपमातरि (धाइमा) इति प्रसिद्धायाम् । अङ्कस्य पालिरिव । आलिङ्गने ।

**अङ्कपाली** स्त्री अङ्कपालि+ङीप् । अङ्कपालिशब्दार्थे वेदिकाख्यगन्धद्रव्ये च ।